-11

1

22

सर्वदानानंतरं   स्व   कल्पे

ॐ गणपतये नमः उपनयनाभिधप्रारंभः तत्र शुद्धसमये रविगुरुचन्द्रतादिशुद्धौ गर्भाष्टमे ऽष्टमे वर्षे वा अनुकूले
षोडशसंवत्सरांतं ब्रह्मवर्चसकामं पंचमे वा उत्तरायणे आपूर्य्यमाणपक्षे ऽनध्यायषष्ठीरिक्ताव्यतिरिक्ततिथौ
रविचंद्रबुधशुक्रगुर्वान्यतमवारे मध्याह्नादर्वाक् कुमारपित्राभ्युदयिके कृते तं ज्ञात्वेत्याचार्य्येणैव कृते
ब्राह्मणान्माणवकं भोजयित्वा सशिखकृतक्षौरं स्नानानंतरं यथाशक्त्यलंकृतं कृत्वा बहिः शालायां तुषकेश
शर्करादिरहितायां शुद्धपरिस्कृतभूमावाचार्योऽग्निस्थापनं कुर्यात् तत्र हस्तमात्रपरिमितचतुरस्रकुश
करणकं भूमौ समूहनानंतरं गोमयोदकेनोपलिप्य स्रुवमूलेन प्रागग्रं प्रादेशमात्रमुत्तरोत्तरक्रमेण त्रिरु
२६ ल्लिख्योल्लेखनक्रमेणानामिकांगुष्ठाभ्यां मृदमुद्धृत्य जलेनाभ्युक्ष्य नवीनकांस्येनाग्निमादाय स्वाभिमुखं निद
ध्यात् ततः कुमारमाचार्य्यो शिष्यद्वारा अग्नेः पश्चाद्दक्षिणपार्श्वे स्थापयति ततः कुमारं बद्धांजलिं संबो
धयति ब्रह्मचर्य्यमागामिति ब्रूहि इति प्रैषानंतरं ॐ ब्रह्मचर्य्यमागामिति कुमार आह ॐ ब्रह्मच
र्य्यसानीति ब्रूहि इत्याचार्येणोक्ते ॐ ब्रह्मचर्य्यसानीति कुमार आह अथ माणवकमाचार्य्यो वा
सः परिधापयति तत्राचार्यपठनीयो मंत्रः ॐ येनेन्द्राय बृहस्पतिर्वासः पर्यदधादमृतं तेन त्वा परि

ॐ येनेन्द्रायेत्यंगिरा ऋषिर्बृहस्पतिर्देवता वासः परिधाने विनियोगः

२ पूरयति ॐ आपो हि ष्ठा मयोभुवस्तान ऊर्ज्जे दधातन महे रणाय चक्षसे यो वः शिवतमो रसस्तस्य भाजयते
ह नः उशतीरिव मातरः तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ आपो जनयथा च न इति तिसृभिः ततः
सूर्य्यमुदीक्षस्वेत्याचार्यप्रेरणानन्तरं ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् पश्येम शरदः शतं जी
वेम शरदः शतं शृणुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शर
दः शतात् इत्यनेनादित्यं पश्यति अथ कुमारस्य दक्षिणांसमभि हृदयं दक्षिणहस्तेन स्पृशत्या
चार्यः ॐ मम व्रते ते हृदयं दधामि मम चित्तमनु चित्तं ते अस्तु मम वाचमेकमना जुषस्व बृहस्प
तिष्ट्वा नियुनक्तु मह्यमिति मन्त्रेण ततः कुमारस्य दक्षिणहस्तं गृहीत्वा तं पृच्छति को नामासीति
अमुकशर्माहं भो इति कुमार आह कस्य ब्रह्मचार्यसीत्याचार्यः भवत इति कुमार आह पु
ब्रह्मचार्य्य सो ऽ४ ३ नराचार्यो भाषते ॐ इन्द्रस्याग्निराचार्यस्तवाहमाचार्यस्तवाहमाचार्यो ऽमुकशर्मणः अयमा
णवकं बद्धाञ्जलिं पूर्वादिदिक्चतुष्टयं दक्षिणमुपस्थानं कारयति तत्राचार्यस्य मन्त्रपाठः ॐ प्रजा
पतये त्वा परिदधामि इति प्राच्यां ॐ देवाय त्वा सवित्रे परिदधामीति दक्षिणस्यां ॐ अद्भ्यस्त्वौष २

ब्रह्मा
इयं दुरुक्तमिति वामदेव ऋषिः प्रजापतिर्देवता त्रिष्टुप् छंदः मेखलापरि
धाने विनियोगः ४

दधाम्यसे दीर्घायुत्वाय बलाय वर्चसे ततो माणवकस्य द्विराचमनं अथ माणवकस्य वेष्टनत्रयेण प्रवरग्रन्थि
युतां कृत्वा मेखलामाचार्यो बध्नाति तत्र माणवकपठनीयो मंत्रः ॐ इयं दुरुक्तं परिबाधमाना वर्णं पवि
त्रं पुनती म आगात् प्राणापानाभ्यां बलमादधाना स्वसा देवी सुभगा मेखलेयं ॐ युवा सुवासाः परिवी
त आगात् स उ श्रेयान् भवति जायमानः तं धीरासः कवय उन्नयंति स्वाध्यो मनसा देवयंतः इति वार
ततः आचार्यो यज्ञोपवीत सहितं भांडाष्टकं ब्राह्मणेभ्यो दत्वा ॐ यज्ञोपवीतमिति परमेष्ठिऋषिर्लिंगो
क्तो देवता त्रिष्टुप् छंदः उपवीतपरिधाने विनियोगः अर्द्ध यज्ञोपवीतपरिधानं ततो यज्ञोपवीतप
रिदधाति माणवकः तत्राचार्येण पठनीयो मंत्रः ॐ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्ता
त् आयुष्यमग्र्यं प्रतिमुंच शुभ्रं यज्ञोपवीतं बलमस्तु तेजः इति मंत्रेण ततः ऐणेयमजिनं तूष्णीं परि
धत्ते ततो माणवक केशपरिमितं पलाशदंडं आचार्यस्तस्मै प्रयच्छति तं च ॐ यो मे
दंडः परापतद्वैहायसोऽधि भूम्यां तमहं पुनरादद आयुषे ब्रह्मणे ब्रह्मवर्चसाय इति मंत्रेण मा
णवको गृह्णाति ततः आचार्यो वारिणा स्वमंजलीं पूरयित्वा कुमारस्यांजलिं तेनैवांजलिजलेन

पालाशदंडं ब्राह्मणस्य वैल्वो राजन्यस्य औदुंबरो वैश्यस्य वैणवं सर्वेषां

द्वयोर्मध्ये मंत्रैकस्य पाठः = ततो यज्ञोपवीतपरिदधाति माणवकः ४

ॐ यो मे दंडः इति प्रजापतिर्ऋषिर्दंडो देवता
यजुर्दंडग्रहणे विनियोगः ४

उ

३ त्रः स्रुवः आज्यं षट्पंचाशदुत्तरशतार्थ्यमुष्टिप्रमितहयावच्छिन्नामतंडुलपूर्णपात्रं पवित्रछेदनकुशानां
पूर्वदिशिक्रमेणासादनीयं ततः पवित्रछेदनकुशैः पवित्रे छित्वा सपवित्रकरेण प्रणीतोदकं त्रिः प्रोक्षणीपा
त्रे निधायानामिकांगुष्ठाभ्यां पवित्रे उत्तराग्रे गृहीत्वा त्रीरुत्पूय प्रोक्षणीपात्रं वामकरेण द्धायानामिकांगु
ष्ठाभ्यां गृहीतपवित्राभ्यां तज्जलं किंचित्रिरुत्क्षिप्य प्रणीतोदकेन प्रोक्षणीं त्रिरभिषिच्य प्रोक्षणीजलेना
सादितवस्तुसेचनं कृत्वाऽग्निप्रणीतयोर्मध्ये प्रोक्षणीपात्रं निदध्यात् आज्यस्थाल्यामाज्यं निरूप्याधि
श्रयणं ततः कुशं प्रज्वाल्याज्योपरि प्रदक्षिणं भ्रामयित्वावक्षेनत्यादिप्य स्रुवं त्रिः परितप्य संमार्जनैः
कुशानामग्रैरंतरतो मूलैर्बाह्यतः स्रुवं संमृज्य प्रणीतोदकेनाभ्युक्ष्य पुनस्त्रिः परितप्य दक्षिणतो नि
दध्यात् ततः आज्यमग्नेरवतार्य त्रिः प्रोक्षणीवदुत्पूयावेक्ष्य सत्यपद्रव्ये तन्निरसनं कृत्वा पुनः प्रोक्षणी
वदुत्पूय ततः उत्थायोपयमनकुशान्वामहस्ते कृत्वा प्रजापतिं मनसा ध्यात्वा तूष्णीं घृताक्ताः समि
धस्तिस्रः प्रक्षिपेत् उपविश्य सपवित्रप्रोक्षण्युदकेन प्रदक्षिणक्रमेणाग्निं पर्युक्ष्य प्रणीतापात्रे पवि
त्रे निधाय पातितदक्षिणजानुर्ब्रह्मणान्वारब्धः समिद्धतमेऽग्नौ स्रुवेणाज्याहुतिर्जुहोति तत्रतत्र ३

धिभ्यः परिदधामीति प्रतीच्यां ॐ द्यावापृथिवीभ्यां त्वां परिदधामीत्युदीच्यां ॐ विश्वेभ्यस्त्वा देवेभ्यः परिदधा
मीत्यधः ॐ सर्वेभ्यस्त्वा भूतेभ्यः परिदधामीत्युपरिष्टात् ततोग्निं प्रदक्षिणीकृत्याचार्यो दक्षिणादिशि उपविशति मा
णवकः ततः पुष्पचंदनताम्बूलवासांस्यादाय ततः ॐ अद्य कर्त्तव्योपनयनहोमकर्मणि कृताकृ
तावेक्षणरूपब्रह्मकर्मकर्त्तुममुकगोत्रममुकशर्म्माणं ब्राह्मणमेभिः पुष्पचंदनताम्बूलवासोभि
र्ब्रह्मत्वेन त्वामहं वृणे इति ब्राह्मणं वृणुयात् ॐ वृतोस्मीति प्रतिवचनं यथाविहितं कर्म कुर्वीत्या
चार्येणोक्ते ॐ करवाणीति प्रतिवचनानंतरं अग्नेर्दक्षिणतः शुद्धमासनं दत्वा तदुपरि प्रागग्रान्कुशानास्तीर्या
ग्निं प्रदक्षिणं कारयित्वाऽस्मिन्कर्मणि त्वं मे ब्रह्मा भवेत्यभिधाय ॐ भवानीति तेनोक्ते तदुपरि ब्राह्मणमुदङ्मु
खमुपवेश्य ततः प्रणीतापात्रं पुरतः कृत्वा वारिणा परिपूर्य कुशैराच्छाद्य ब्रह्मणो मुखमवलोक्याग्नेरुत्तरतः
कुशोपरि निदध्यात् ततः परिस्तरणं बर्हिषश्चतुर्थभागमादायाग्नेयादीशानांतं ब्रह्मणोग्निपर्यंतं नैरृत्या
द्वायव्यंतं अग्नितः प्रणीतापर्यंतं ततोग्नेरुत्तरतः पश्चिमदिशि पवित्रच्छेदनार्थं कुशत्रयं पवित्रार्थं साग्र
मनंतर्गर्भं कुशपत्रद्वयं प्रोक्षणीपात्रमाज्यस्थाली संमार्जनार्थं कुशत्रयं उपयमनकुशाः समिधस्तिस्र

उ

४ कृतेस्वाहा इदमग्नयेस्विष्टकृते इतिस्विष्टकृत् ततः संस्रवप्राशनं आचम्य ततोब्राह्मणेदक्षिणा ओं अद्य
तस्मिन्नुपनयनहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थमिदं पूर्णपात्रं प्रजापतिदैवतममुकगोत्रा
यामुकशर्मणेब्राह्मणाय दक्षिणां तुभ्यमहं संप्रददे इतिदक्षिणां दद्यात् ओं स्वस्तिप्रतिवचनं ततोब्रह्मग्रंथि
विमोकः ओं सुमित्रियानआपओषधयः सन्त्विति पवित्राभ्यां जलमानीय तेनशिरः संमृज्य ओं दुर्मित्रियास्त
स्मैसंतुयोस्मान्द्वेष्टियंचवयंद्विष्मः इत्यैशान्यांप्रणीतान्युब्जीकरणं ततः आस्तरणक्रमेणबर्हिरुत्था
प्य घृतेनाभिघार्यहस्तेनैवजुहुयात् ओं देवागातुविदोगातुंवित्वागातुमितमनसस्पतइमंदेवयज्ञं स्वा
हा वातेधाः स्वाहा इतिबर्हिर्होमः आचार्य्यः कुमारस्यानुशासनं करोति ओं ब्रह्मचार्यसीत्याचार्य्यः ओं
असानीतिकुमारः आह ओं आपोऽशानइत्याचार्य्यः ओं अश्नानीतिकुमारः कर्मकुर्वित्याचार्य्यः ओं
करवाणीतिकुमारः मादिवास्वाप्सीरित्याचार्य्य ओं नस्वपामीतिकुमारः ओं वाचंयच्छ इत्याचार्यः ओं यच्छामी
तिकुमारः ओं समिधमाधेहि इत्याचार्य्यः ओं आदधानीतिकुमारः ओं आपोऽशानइत्याचार्यः ओं अश्ना
नीतिकुमारः अथाग्नेरुत्तरतः प्रत्यङ्मुखायोपविष्टायाचार्यचरणोपसंग्रहणपूर्वकमुपसन्नाचा ४

दाहृत्यानंतरं स्रुवावस्थितघृतशेषस्य प्रोक्षणीपात्रे प्रक्षेपः ॐप्रजापतये स्वाहा इदं प्रजापतये इति मनसा ॐइं
द्राय स्वाहा इदमिंद्राय इत्याघारौ ॐअग्नये स्वाहा इदमग्नये ॐसोमाय स्वाहा इदं सोमाय इत्याज्यभागौ
ॐभूः स्वाहा इदं भूः ॐभुवः स्वाहा इदं भुवः ॐस्वः स्वाहा इदं स्वः एता महाव्याहृतयः ॐत्वन्नो अग्ने वरुण
स्य विद्वान्देवस्य हेडो अवयासिसीष्ठाः यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषाꣳसि प्रमुमुग्ध्यस्मत्स्वा
हा इदमग्निवरुणाभ्यां ॐसत्वन्नो अग्नेवमो भवो नेदिष्ठो अस्या उषसो व्युष्टौ अवयक्ष्व नो वरुणꣳरर
णो वीहि मृडीकꣳसुहवो न एधि स्वाहा इदमग्निवरुणाभ्यां ॐअयाश्चाग्नेस्यनभिशस्तिपाश्च सत्यमि
त्वमया असि अयानो यज्ञं वहास्ययानो धेहि भेषजꣳस्वाहा इदमग्नये ॐयेते शतं वरुणये सहस्रंय
ज्ञियाः पाशा वितता महान्तः तेभिर्नो अद्य सवितोत विष्णुर्विश्वे [illegible] मुंचंतु मरुतः स्वर्काः स्वाहा इ
दं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यः ॐउदुत्तमं वरुणपाशमस्मदवाधमं विम
ध्यमꣳश्रथाय अथा वयमादित्य व्रते तवानागसो अदितये स्याम स्वाहा इदं वरुणाय एताः
सर्वाः प्रायश्चित्त संज्ञकाः ॐप्रजापतये स्वाहा इदं प्रजापतये इति मनसा प्राजापत्यं ॐअग्नये स्विष्ट

उ

५ मेपाहि ॐ आयुर्दा अग्नेस्यायुर्मेदेहि ॐ वर्चोदा अग्नेसिवर्चोमेदेहि ॐ अग्नेयन्मेतन्वाऊनंतन्मआपृण ॐ मे
धांमेदेवः सविता आदधातु ॐ मे धांमेदेवीसरस्वती आदधातु ॐ मे धांमे अश्विनौ देवावाधत्तांपुष्करस्र
जौ ततः सर्वगात्रादिषु दक्षिणपाणिनास्पर्शः अत्रप्रत्येकंमंत्र ॐ अंगानि चमआप्यायंतां इतिसर्वगात्रा
लंभने ॐ वाक् चमआप्यायतामिति मुखालंभने ॐ प्राणश्चमआप्यायतामिति नासिकयोः ॐ चक्षुश्च
मआप्यायतामिति चक्षुषी ॐ श्रोत्रंचमआप्यायतामिति श्रोत्रे ॐ यशोबलंचमआप्यायतामिति मंत्र
पाठमात्रं ततोदक्षिणकरानामिकाग्रगृहीतभस्मना ललाटे ग्रीवायां दक्षिणबाहुमूले हृदि च त्र्यायु
षंकुर्य्यात् तत्रयथासंख्येन मंत्रचतुष्टयं ॐ त्र्यायुषंजमदग्नेः ॐ कश्यपस्यत्र्यायुषं ॐ यद्देवेषुत्र्या
युषं ॐ तन्नोअस्तुत्र्यायुषं ततोव्यस्तपाणिभ्यांपृथिवीस्पर्शनाभिनंकुर्यात् तत्रप्रकारः ॐ अमुकगो वादनं
हं अमुकप्रवरोहममुकशर्माहं भो वैश्वानर त्वां अभिवादये ततोनेनैवक्रमेणसंबोधवहणमामेवाद्या
चार्यंतथैवाभिवादयेत् आयुष्मान्भवसौम्य इत्याचार्योब्रूयात् ततोभिक्षापात्रमादाय प्रथमंमातुः
सकाशात् ॐ भवतिभिक्षांमेदेहि इतिप्रार्थनानंतरं तद्दत्तांचादायाचार्यायनिवेदयेत् तथैवमि
तमः

ध्यंसमीन्मकर्णायाचार्य्यः स्वयमपिमपि समीक्षितायास्मै निवारितं शं खेत्तूर्ष्यादिशब्दइष्टांसके गायत्रीमन्वाह तत्रप्रथमाष्टेनौ
ओं भूर्भुवः स्वस्तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमहि धियो यो नः प्रचोदयात् ओं पुनर्वारद्वयं अग्नंतु सह पाठे विशेषः अग्निमाणव य
कस्याचार्यदक्षिणदिशि अग्निमग्निमोपविश्य घृताक्तस्रुक्कं निषिद्धेतरेंधनेन जुहुयात् ततः ओं अग्ने सुश्रवः सुश्रवसमाकुरु
ओं यथा त्वमग्ने सुश्रवः सुश्रवा असि ओं एवं मां सुश्रवः सौश्रवसं कुरु ओं यथा त्वमग्ने देवानां यज्ञस्य निधिपा असि एवमहं
ट मनुष्याणां देवस्य निधिपो भूयासं ततः प्रदक्षिणमग्निं वारिणा पर्युक्ष्य उत्थाय स्वप्रादेशमितां घृताक्तपलाशसमिधमा
पे दाय ओं अग्नये समिधमाहार्षं बृहते जातवेदसे यथा त्वमग्ने समिधा समिध्यस एवमहमायुषा मेधया वर्च भ =
सा प्रजया पशुभिर्ब्रह्मवर्चसेन समिंधे जीवपुत्रो ममाचार्यो मेधाव्यहमसान्यनिराकरिष्णुर्यशस्वी तेजस्वी ब्रह्म
वर्चस्यन्नादो भूयासं स्वाहा इति मंत्रेण जुहुयात् एवं समिद्द्वितयं जुहुयात् उपविश्य घृताक्तस्रुक्कं निषिद्धेत
रेंधनेन पंचाहुतीर्जुहुयात् ओं अग्ने सुश्रवः सुश्रवसमाकुरु ओं यथा त्वमग्ने सुश्रवः सुश्रवा असि ओं एवं मां
सुश्रवः सौश्रवसं कुरु ओं यथा त्वमग्ने देवानां यज्ञस्य निधिपा असि ओं एवमहं मनुष्याणां देवस्य निधिपो
भूयासं ततः प्रदक्षिणमग्निं पर्युक्ष्य तूष्णीं पाणी प्रतप्य मुखं प्रति मंत्रान्ते विमृशति ओं तनूपा अग्नेसि तन्वं

उ.न
६

ॐ

दाय ॐ अद्य कर्तव्य वेदारंभहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मकर्तुं अमुकगोत्रम् अमुकशर्माणं ब्रा-
ह्मणमेभिः पुष्पचंदनताम्बूलवासोभिर्ब्रह्मत्वेन त्वामहं वृणे इति ब्राह्मणं वृणुयात् वृतोस्मीति प्रतिवचनं ॐ
यथाविहितं कर्म कुर्विति अभिधाय ॐ करवाणीति तेनोक्ते अग्नेर्दक्षिणतः शुद्धमासनं दत्वा तदुपरि प्रागग्रा-
न् कुशानास्तीर्य अग्निप्रदक्षिणक्रमेण आनयित्वा ॐ अस्मिन्कर्मणि त्वं मे ब्रह्मा भव ॐ भवानीति तेन
नोक्ते ब्राह्मणमुदङ्मुखं तत्रोपविश्य प्रणीतापात्रं पुरतः कृत्वा वारिणा परिपूर्य कुशैराच्छाद्य ब्रह्मणो मु-
खमवलोक्याग्रेरुत्तरतः कुशोपरि निदध्यात् ततः परिस्तरणं बर्हिषश्चतुर्थभागमादायाग्नेयादीशानान्तं
ब्रह्मणोग्निपर्यन्तं नैरितात् वायव्यान्तं अग्नितः प्रणीतापर्यन्तं ततोऽग्नेरुत्तरतः पश्चिमदिशि पवित्रच्छेद-
र्थं कुशत्रयं पवित्रकरणार्थं साग्रमनन्तर्गर्भं कुशपत्रद्वयं प्रोक्षणीपात्रमाज्यस्थाली संमार्जनकुशाः
उपयमनकुशाः समिधस्तिस्रः स्रुवः आज्यं पूर्णपात्रं पवित्रच्छेदनकुशानां पूर्वपूर्वदिशि दिशि क्रमेणा-
सादनीयं ततः पवित्रच्छेदनकुशैः पवित्रे छित्वा सपवित्रकरेण प्रणीतोदकं त्रिः प्रोक्षणीपात्रे निधाय
द्वाभ्यामनामिकाङ्गुष्ठाभ्यामुत्तराग्रे पवित्रे गृहीत्वा त्रिरुत्पवनं ततः प्रोक्षणीपात्रं वामहस्ते कृत्वा दक्षि-
णहस्तानामिकाङ्गुष्ठाभ्यां त्रिरुदिङ्गनं ततः प्रणीतोदकेन प्रोक्षणीपात्रमभ्युक्ष्य प्रोक्षणीजलेनासा-
दितवस्तुसेचनमग्निप्रणीतयोर्मध्ये प्रोक्षणीपात्रं निदध्यात् ततः आज्यस्थाल्यामाज्यनिर्वापः अधि-
श्रयणं ततः कुशं प्रज्वाल्याज्यस्याग्नेश्चोपरि प्रदक्षिणं भ्रामयित्वा चाग्नौ तत्प्रक्षेपः ततस्त्रिः स्रुवप्रतप-
नं संमार्जनकुशानामग्रैरन्तरतो मूलैर्बाह्यतः स्रुवं संमृज्य प्रणीतोदकेनाभ्युक्ष्य पुनस्त्रिः प्रतप्य ६

ततः

क्षांतरं याचेत् आचार्य्येण भुक्त्वेत्यनुज्ञातो भिक्षां स्वीकुर्यात् ततः फलपुष्पघृतपूर्णस्रुवेण ब्रह्मचारिदक्षिण
करस्पृष्टेनाचार्यः पूर्णाहुतिं दद्यात् तत्र मंत्रः ॐ मूर्द्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आजातम
ग्निं कविं सम्राजमतिथिं जनानामासन्ना पात्रं जनयंत देवाः स्वाहा इदमग्नये ततः स्रुवेण भस्मानीय
दक्षिणानामिकाग्रगृहीतभस्मना ॐ त्र्यायुषं जमदग्नेरिति ललाटे ॐ कश्यपस्य त्र्यायुषमिति ग्रीवायां ॐ यद्दे
वेषु त्र्यायुषमिति दक्षिणबाहुमूले ॐ तन्नो अस्तु त्र्यायुषमिति हृदि इति त्र्यायुषं कुर्यात् कुमारपक्षे तन्नो
इत्यस्य स्थाने तत्ते इति विशेषः अथ क्षारलवण मधुमांसादिनिवृत्तिः उद्धृतजलस्नान दण्डकृष्णाजि
नधारणं वृक्षारोहण विषमभूमिलंघन नग्नस्त्रीनिरीक्षण स्त्रीसंभोगव्यसन व्यावृत्तिरपि ब्रह्मचारिणो
नियमाः तद्दिने ब्रह्मचारिभिक्षाप्रतोहः शेषं स्थितः एवगमयेत् ततः सायं संध्यां कृत्वा तस्मिन्नेवाग्नौ
पूर्ववत्पर्युक्षणपरिसमूहने कृत्वा वाचं विसृजेत् परिसमूहनंतु शुष्कनिषिध्येतरेंधनेनाग्नौ प्रक्षेपः ततः सं
ध्यामुपास्य प्रतिदिनं सायं प्रातरपि ब्रह्मचारिणा कर्त्तव्यः अथ वेदारंभः तत्र कृतनित्यक्रिय आचार्यः
कुशैर्हस्तमात्रपरिमितां चतुरस्त्रां भूमिं कुशैः परिसमुह्य तान्कुशानैशान्यां परित्यज्य गोमयोदकेनो
पलिप्य स्रुवमूलेनोत्तरतः प्रागग्रं प्रादेशमात्रं त्रिरुल्लिख्य उल्लेखनक्रमेणानामिकांगुष्ठाभ्यां मृदमु
द्धृत्य जलेनाभ्युक्ष्य कांस्यपात्रेणाग्निमानीयाभिमुखमुपसमाधाय पुष्पचंदनतांबूलवस्त्राणि

८ सामस्वाहा इदं वरुणाय इति सर्वप्रायश्चित्तं ॐ प्रजापतये स्वाहा इदं प्रजापतये इति मनसा ॐ अग्नये स्विष्टकृते
स्वाहा इदमग्नये स्विष्टकृते ततः ततः संस्रवप्राशनं आचम्य ॐ अद्य कृतैतद्विवाहहोमकर्मणि कृताकृतावे
क्षणरूपब्रह्मकर्मप्रतिष्ठार्थं इदं पूर्णपात्रं प्रजापतिदैवतं अमुकगोत्रायामुकशर्मणे ब्राह्मणाय दक्षिणात्वेन तुभ्यम
हं संप्रददे इति दक्षिणां दद्यात् ॐ स्वस्ति प्रतिवचनं ततो ब्रह्मग्रन्थिविमोकः ॐ सुमित्रिया न आप ओषधयः सन्तु 13
इति पवित्राभ्यां प्रणीताजलमानीय तेन शिरः संमृज्य ॐ दुर्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यं च वयं द्विष्मः इति
मन्त्रेण प्रणीतान्युब्जीकरणम् ततः स्तरणक्रमेण बर्हिरानीय घृतेनाभिघार्य हस्तेनैव जुहुयात् ॐ देवा गातु
विदो गातुं वित्त्वा गातुमित मनसस्पत इदं देव यज्ञं स्वाहा वाते धाः स्वाहा वाते धाः स्वाहा इति बर्हिर्होमः ततः
काश्मीरगमनम् ततः इष्टासके वेद्यारंभं गुरु कारयेत् तत्र क्रमः ॐ भूर्भुवः स्वः ॐ तत्सवितुर्वरेण्यं भर्गो दे
वस्य धीमहि धियो यो नः प्रचोदयात् ॐ इति प्रणवान्ते पठित्वा पंक्तिं नमस्कारं च कारयेत् ॐ समिधाग्निं दुव
स्यत घृतैर्बोधयतातिथिम् आस्मिन् हव्या जुहोतन सुसमिद्धाय शोचिषे इति काण्डकान्तरपाठयेत् ततः स
प्रणवं स्वस्ति वाचयित्वा ततो उत्थाय फलपुष्पसमन्वितस्रुचं चारि दक्षिणकरस्पृष्टेन स्रुवेण घृतेन
पूर्णाहुतिं दद्यात् ॐ मूर्द्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आ जातमग्निम् कविं सम्राजमतिथिं जनाना
मासन्ना पात्रं जनयन्त देवाः स्वाहा इति पूर्णाहुतिः ततः उपविश्य स्रुवेण भस्मानीय दक्षिणानामिकाग्रगृ
हीतभस्मना ॐ त्र्यायुषं जमदग्नेरिति ललाटे ॐ कश्यपस्य त्र्यायुषं इति ग्रीवायां ॐ यद्देवेषु त्र्यायुषं इति दक्षि
णबाहुमूले ॐ तन्नो अस्तु त्र्यायुषमिति हृदि अनेनैव क्रमेण ब्रह्मचारि ललाटेऽपि ततस्तत्र स्वस्ति ८

प्रि

दक्षिणतो निदध्यात् ततआज्यमप्युदक्षिणांकारयित्वावतार्याग्नेर्निदध्यात् ततः आज्येप्रोक्षणीवदुत्पवनंअवेक्ष्यसत्यपदव्येननिरस
मंकृत्वाततः प्रोक्षस्रुत्रुवंततः ॐ स्यायोपयमनकुशानादायप्रजापतिंमनसाध्यात्वातूष्णीमग्नौसमिधः प्रक्षेपेत् ततउपविश्य
सपवित्रप्रोक्षण्युदकेनप्रदक्षिणक्रमेणाग्निंपर्युक्ष्यप्रणीतापात्रेपवित्रेनिधायब्रह्मणान्वारब्धः पातितदक्षिणजानुः समिद्धत
मेऽग्नौजुहुयात् तत्रपूर्वमाहुतिचतुष्टयेनस्रुवावस्थितहुतशेषघृतस्यप्रोक्षणीपात्रेप्रक्षेपः ॐ प्रजापतये स्वाहा इदंप्रजाप
तये इतिमनसा ॐ इंद्राय स्वाहा इदमिंद्राय इत्याघौ ॐ अग्नये स्वाहा इदमग्नये ॐ सोमाय स्वाहा इदंसोमाय इत्याज्यभा
गौ ततः प्राकृतोऽन्वारब्धकर्त्तृको होमः ॐ अन्तरिक्षाय स्वाहा इदमन्तरिक्षाय ॐ वायवे स्वाहा इदंवायवे ॐ ब्रह्मणे स्वा
हा इदंब्रह्मणे ॐ छंदोभ्यः स्वाहा इदंछंदोभ्यः ततः सामान्याहुतयः ॐ प्रजापतये स्वाहा इदंप्रजापतये इतिमनसा ॐ
देवेभ्यः स्वाहा इदंदेवेभ्यः ॐ ऋषिभ्यः स्वाहा इदमृषिभ्यः ॐ श्रद्धायै स्वाहा इदंश्रद्धायै ॐ मेधायै स्वाहा इदंमेधायै
ॐ सदसस्पतये स्वाहा इदंसदसस्पतये ॐ अनुमतये स्वाहा इदमनुमतये ततोऽन्वारब्धकर्तृको होमः तत्रादाकृत्यनंतरस्रु
वावस्थितहुतशेषघृतस्यप्रोक्षणीपात्रेप्रक्षेपः ॐ भूः स्वाहा इदंभूः ॐ भुवः स्वाहा इदंभुवः ॐ स्वः स्वाहा एताः महाव्या इदंस्वः
हृतयः ॐ त्वन्नोऽग्नेवरुणस्यविद्वान्देवस्यहेडोऽवयासिसीष्ठाः यजिष्ठोवह्नितमः शोशुचानोविश्वाद्वेषांसिप्रमुमुग्ध्य
स्मत् स्वाहा इदमग्निवरुणाभ्यां ॐ सत्वन्नोऽग्नेवमोभवोतीनेदिष्ठोअस्याउषसोव्युष्टौ अवयक्ष्वनोवरुण
ꣳरराणोवीहिमृडीकꣳसुहवोनएधि स्वाहा इदमग्निवरुणाभ्यां ॐ अयाश्चाग्नेस्यनभिशस्तिपाश्चसत्वमित्त्वमया
असिअयानोयज्ञंवहास्ययानोधेहिभेषजꣳ स्वाहा इदमग्नये ॐ येतेशतंवरुणयेसहस्रंयज्ञियाः पाशावितता महान्तः
तेभिर्नोअद्यसवितोतविष्णुर्विश्वेमुंचंतुमरुतः स्वर्काः स्वाहा इदंवरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो म
रुद्भ्यः स्वर्केभ्यः ॐ उदुत्तमंवरुणपाशमस्मदवाधमंविमध्यमꣳश्रथाय अथावयमादित्यव्रतेतवानागसोअदितये

त्रकरेण प्रणीतोदकं त्रिः प्रोक्षणीपात्रे निधायानामिकांगुष्ठाभ्यां पवित्रे गृहीत्वा त्रिरुत्पूय प्रोक्षणीपात्रं वामक
रे निधायानामिकांगुष्ठाभ्यां गृहीतपवित्राभ्यां तज्जलं किंचित्त्रिः प्रक्षिप्य प्रणीतोदकेन प्रोक्षणीमभ्युक्ष्य
प्रोक्षणीजलेनासादितवस्तून्यभिषिंच्याग्निप्रणीतयोर्मध्ये प्रोक्षणीपात्रं निदध्यात् ततः आज्यस्था
ल्यामाज्यं निरूप्याधिश्रयणं ततस्तृणं प्रज्वाल्याज्यस्याग्रे श्रोपरि प्रदक्षिणं भ्रामयित्वा वह्नौ तत्प्र
क्षिप्य स्रुवं त्रिः प्रतप्य संमार्जनकुशानामग्रैरंतरतो मूलैर्बाह्यतः स्रुवं संमृज्य प्रणीतोदकेनाभ्यु
क्ष्य पुनः प्रतप्य स्रुवं दक्षिणतो निदध्यात् ततः आज्यमग्निं प्रदक्षिणं कारयित्वा उत्तार्य त्रिः प्रोक्ष
णीवदुत्पूयावेक्ष्य सत्यपद्रव्ये तन्निरसनं कृत्वा पुनः पूर्ववत्प्रोक्षण्युत्पवनं ततः उत्थायोपयमन
कुशान्वामहस्ते कृत्वा प्रजापतिं मनसा ध्यात्वा तूष्णीमग्नौ घृताक्ताः समिधः प्रक्षिपेत् ततः उपवि
श्य सपवित्रप्रोक्षण्युदकेन प्रदक्षिणक्रमेणाग्निं पर्युक्ष्य प्रणीतापात्रे पवित्रे निधाय पातितदक्षि
णजानुः समिद्धतमेऽग्नौ ब्रह्मणान्वारब्धः स्रुवेणाज्याहुतीर्जुहोति तत्र प्रथमाहुतिचतुष्टये प्रत्या
हुत्यनंतरं स्रुवावस्थिताहुतशेषघृतस्य प्रोक्षणीपात्रे प्रक्षेपः ॐ प्रजापजापतये स्वाहा इदं प्रजा
पतये इति मनसा ॐ इंद्राय स्वाहा इदमिंद्राय इत्याघारौ ॐ अग्नये स्वाहा इदमग्नये ॐ सोमा
य स्वाहा इदं सोमाय इत्याज्यभागौ ततोऽन्वारब्धकर्तृको होमः ॐ अंतरिक्षाय स्वाहा इदमं
तरिक्षाय ॐ वायवे स्वाहा इदं वायवे ॐ ब्रह्मणे स्वाहा इदं ब्रह्मणे ॐ छंदोभ्यः स्वाहा इदं छं
दोभ्यः ॐ प्रजापतये स्वाहा इदं प्रजापतये इति मनसा ॐ देवेभ्यः स्वाहा [इदं देवेभ्यः] ॐ ऋषिभ्यः स्वाहा ८

निर्विशेषः अथ समावर्त्तनं तत्र शुभदिने प्रह्वीभूय आचार्य्यं स्नास्यामि इति कुमार आचार्यं भाषते 16
तत्र स्नाहीत्याचार्य्यः ततो ब्रह्मचारिण्याचार्य्यसन्निहित दक्षिणदिशि उपविष्टे कृतस्नानादिराचा
र्य्यः ततो ब्रह्मचारिण्याचार्य्यसन्निहिते ।। कुशैर्हस्तमात्रपरिमितां चतुरस्रां भूमिं परिसमुह्य ता
नैशान्यां परित्यज्य गोमयोदकेनोपलिप्य स्रुवमूलेनोत्तरक्रमेण त्रिरुल्लिख्योल्लेखनक्रमेणोद्धृत्य
जलेनाभ्युक्ष्य कांस्येनाग्निमानीय प्रत्यङ्मुखं निदध्यात् ततः पुष्पचन्दनताम्बूलवासांस्यादाय ॐ
अद्यामुकगोत्रस्य कर्त्तव्यसमावर्त्तनहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मकर्त्तुममुकगो
त्रममुकशर्म्माणं ब्राह्मणमेभिः पुष्पचन्दनताम्बूलवासोभिर्ब्रह्मत्वेन त्वामहं वृणे इति ब्राह्मणं वृणु
यात् ॐ यथाविहितं कर्म कुर्वित्यभिधाय ॐ करवाणीति तेनोक्ते ॐ अग्नेर्दक्षिणतः शुद्धमासनं
दत्वा तदुपरि प्रागग्रान्कुशानास्तीर्य्य अग्निप्रदक्षिणक्रमेणाभ्रामयित्वाऽस्मिन्कर्मणि त्वं मे (
ब्रह्मा भवेत्यभिधाय ॐ भवानीति तेनोक्ते ब्रह्माणमुदङ्मुखं तत्रोपवेश्य ततः प्रणीतापात्रं पु
रतः कृत्वा वारिणा परिपूर्य्य कुशैराच्छाद्य ब्रह्मणो मुखमवलोक्याऽग्नेरुत्तरतः कुशोपरि निदध्यात्
ततः परिस्तरणं बर्हिषश्चतुर्थभागमादायाग्नेयादीशानान्तं ब्रह्मणोऽग्निपर्यन्तं नैरृत्याद्वायव्यान्तम
ग्नितः प्रणीतापर्यन्तं ततोऽग्नेरुत्तरतः पश्चिमदिशि पवित्रच्छेदनार्थं कुशत्रयं पवित्रकरणार्थं साग्रम
नन्तर्गर्भकुशपत्रद्वयं प्रोक्षणीपात्रमाज्यस्थाली सम्मार्जनकुशा उपयमनकुशाः समिधस्तिस्रः स्रुवः आ
ज्यं पूर्णपात्रं पवित्रच्छेदनकुशानां पूर्वदिशि क्रमेणासादनीयं ततः पवित्रच्छेदनकुशैः पवित्रे छित्वा सपवि

इदं स्विष्टिभ्यः ओं श्रद्धायै स्वाहा इदं श्रद्धायै ओं मेधायै स्वाहा इदं मेधायै ओं सदसस्पतये स्वाहा इदं सदसस्पतये ओं
अनुमतये स्वाहा इदमनुमतये ततो ब्रह्मणान्वारब्धः जुहुयात् अस्माकं तदग्नये तत्र ह्याहुत्यनन्तरं स्रुवाव
स्थितान्याज्यस्य प्रोक्षणीपात्रे प्रक्षेपः ओं भूः स्वाहा इदं भूः ओं भुवः स्वाहा इदं भुवः ओं स्वः स्वाहा इदं स्वः एता महाव्या
हृतयः ओं त्वन्नो अग्ने वरुणस्य विद्वान्देवस्य हेडो अवयासिसीष्ठाः यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वे
षांसि प्रमुमुग्ध्यस्मत् स्वाहा इदमग्नीवरुणाभ्यां ओं सत्वन्नो अग्नेवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ अ 17
वयक्ष्वनो वरुणं रराणो वीहि मृडीकं सुहवो न एधि स्वाहा इदमग्नीवरुणाभ्यां ओं अयाश्चाग्नेस्यन
भिशस्तिपाश्च सत्वमित्वमयाअसि अयानो यज्ञं वहास्यया नो धेहि भेषजं स्वाहा इदमग्नये ओं ये ते
शतं वरुणा ये सहस्रं यज्ञियाः पाशा वितता महान्तः तेभिर्नो अद्य सवितोत विष्णुर्विश्वे मुंचन्तु मरुतः स्वर्काः
स्वाहा इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यः ओं उदुत्तमं वरुणपाशमस्मदवा
धमं विमध्यमं श्रथाय अथा वयमादित्यव्रते तवानागसो अदितये स्याम स्वाहा इदं वरुणाय इति सर्व
प्रायश्चित्तं ओं प्रजापतये स्वाहा इदं प्रजापतये इति मनसा ओं अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृ
ते ततः संस्रवप्राशनं आचम्य ओं अद्य कृतैतत्समावर्तनहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मक
र्मप्रतिष्ठार्थमिदं पूर्णपात्रं प्रजापतिदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय दक्षिणां तुभ्यमहं संप्रद
दे इति दक्षिणां दद्यात् ओं स्वस्तीति प्रतिवचनं ततो ब्रह्मग्रन्थिविमोकः पवित्राभ्यां प्रणीताजलेन ओं सुमित्रियान नं
आप ओषधयः सन्त्विति मंत्रेण [illegible] शिरः संमृज्य ओं दुर्मित्रियास्तस्मै सन्तु योस्मान्द्वेष्टि यं च वयं द्विष्मः

उ:

९ इति मंत्रेणेशान्यां प्रणीतान्युब्जीकरणं ततः स्तरणक्रमेणाबर्हिरानीय छत्रेनाभिघार्य ॐ देवा गातुविदो गातुं वित्त्वा गातुमित
मनसस्पत इमं देव यज्ञं स्वाहा वाते धाः स्वाहा इति मंत्रेणाबर्हिर्होमः ततो ब्रह्मणोन्वारब्धः कर्त्तं कुकर्म ततोग्नि
पश्चिमेोपविष्टो ब्रह्मचारी परिसमूहनं कुर्यात् तत्र घृताक्तशुष्कनिषिद्धेतरेंधनेन पंचाहुति हस्तेनैव जुहुया
त् ॐ अग्नये सुश्रवः सुश्रवसं मा कुरु ॐ यथा त्वमग्ने सुश्रवः सुश्रवा असि ॐ एवं मां सुश्रवः सौश्रवसं कुरु ॐ य
था त्वमग्ने देवानां यज्ञस्य निधिपा असि ॐ एवमहं मनुष्याणां वेदस्य निधिपो भूयासं ततः प्रदक्षिणमग्निं वारि
णा पर्युक्ष्य उत्थाय घृताक्तां प्रादेशमितां समिधमादाय जुहुयात् तत्र मंत्रः ॐ अग्नये समिधमहार्षं बृह
ते जातवेदसे यथा त्वमग्ने समिधा समिध्यसे एवमहमायुषा मेधया वर्चसा प्रजया पशुभिर्ब्रह्मवर्चसेन
समिंधे जीवपुत्रो ममाचार्यो मेधाव्यहमसान्यनिराकरिष्णुर्यशस्वी तेजस्वी ब्रह्मवर्चस्यन्नादो भू
यासं स्वाहा ततः समिदन्तरद्वयमनेनैव क्रमेण मंत्रेणानेनैव क्रमेण प्रत्येकं हुत्वा उपविश्य पुनरनेनैव क्रमेण
पंचाहुतीर्घृताक्तशुष्कनिषिद्धेतरेंधनेन जुहुयात् ॐ अग्नये सुश्रवः सुश्रवसं मा कुरु ॐ यथा त्वमग्ने सु
श्रवः देवानां यज्ञस्य निधिपा असि एवमहं मनुष्याणां वेदस्य निधिपो भूयासं ततः प्रदक्षिणमग्निं पर्युक्ष्य
तूष्णीं पाणी प्रतप्य मुखं प्रतिमंत्रं नेव मृष्टाति ॐ तनूपा अग्नेसि तन्वं मे पाहि ॐ आयुर्दा अग्नेस्यायुर्मे दे
हि ॐ वर्चोदा अग्नेसि वर्चो मे देहि ॐ अग्ने यन्मे तन्वा ऊनं तन्म आपृण ॐ मेधां मे देवः सविता आ
दधातु ॐ मेधां मे देवी सरस्वती आदधातु ॐ मेधां मे अश्विनौ देवावाधत्तां पुष्करस्रजौ ततः सर्वांगा ९

सुश्रवा अ
सि एवं मां सु
श्रवः सौश्र
वसं कुरु
ॐ यथा त्वम
ग्ने सुश्रवः ४४

18

माद्दिषु दक्षिणपाणिना स्पर्शः मंत्रप्रत्येकं मंत्र ॐ अंगानि च म आप्यायन्तामिति सर्वगात्रालंभने ॐ वाक् च म आप्या
यतामिति मुखालंभने ॐ प्राणश्च म आप्यायतामिति नासिकास्पर्शः ॐ चक्षुश्च म आप्यायतामिति च
क्षुर्द्वयस्पर्शः ॐ श्रोत्रं च म आप्यायतामिति श्रोत्रस्पर्शः ॐ यशोबलं च म आप्यायतामिति मंत्रपाठः त
तो दक्षिणानामिकाग्रगृहीतभस्मना ललाटे ग्रीवायां दक्षिणबाहुमूले हृदि च त्र्यायुषं कुर्यात् यथास
ख्येन मंत्रचतुष्टयं ॐ त्र्यायुषं जमदग्नेः ॐ कश्यपस्य त्र्यायुषं ॐ यद्देवेषु त्र्यायुषं ॐ तन्नो अस्तु त्र्यायुषं त
तो व्यस्तपाणिभ्यां पृथिवीं स्पृशन् प्रथमं वैश्वानरं संबोध्याभिवादयेत् तत्रामुकगोत्रोहममुकप्रवरो
हममुकशर्माहं भो वैश्वानर त्वामभिवादये इति प्रकारः ततस्तथैव वरुणं संबोध्याभिवादयेत् तथैवाचा
र्यं चाभिवादयेत् ततः आयुष्मान्भव सौम्य इत्याचार्यो ब्रूयात् ततोग्नेरुत्तरतः प्रागग्रान्कुशानास्
तीर्य तदुपरि दक्षिणोत्तरक्रमेण आसादितवारिपूर्णकलशाष्टकमेकैकं लक्षणानां पुरतः प्रागग्रेषु कु
शेषु स्थित्वा देकस्मात् आम्रपल्लवेन घटोदकं गृहीत्वा ॐ ये अप्स्वंतरग्नयः प्रविष्टा गोह्य उपगोह्यो
६४ मयूषो मनोहास्खलो विरुजस्तनूदूषुरिन्द्रियहा तान्विजहामि यो रोचनस्तमिह गृह्णामि इति मंत्रेण त
तः तेन मामभिषिंचामि श्रियै यशसे ब्रह्मणे ब्रह्मवर्चसायेत्यात्मानमभिषिंचति ततो द्वितीयघटस्य
मुदकं पूर्ववद्गृहीत्वा आम्रपल्लवेनाभिषिंचति ॐ येन स्त्रियमकृणुतं येनापामृशतं सुरां येनाक्षाव

ॐ भ्र स्विना४ 20

२० मिषिंचतां यद्वानष्टं यश [illegible] णेन ततस्तेनैव क्रमेण तृतीयकलशस्य जलमादाय ओं आपो हि ष्ठा मयोभुव
स्तान ऊर्जे दधातन महे रणाय चक्षुषे इति मंत्रेणाभिषिंच्य तेनैव मंत्रेण तेनैव क्रमेण चतुर्थकलशस्य मि
जलमादाया ओं यो वः शिवतमो रसस्तस्य भाजयतेह नः उशतीरिव मातरः इति मंत्रेणाभिषिंच्य पंच
मकलशस्य जलं तथैवादाय ओं तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ आपो जनयथा च नः
इति मंत्रेणाभिषिंच्य ततोऽविशिष्टकलशत्रयजलं तथैव प्रत्येकं गृहीत्वा तूष्णीं प्रत्येकमभिषिंचति ततो मे
खलामोचनं शिरोभागेन ओं उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय अथा वयमादि
त्य व्रते तवानागसो अदितये स्यामिति मंत्रेण दंडकृष्णाजिने तूष्णीं भूमौ निधायान्यद्वस्त्रं परिधा
योत्तरीयं च कृत्वा आचम्य बद्धांजलिरादित्यमुपतिष्ठेत ब्रह्मचारी ओं उद्यन्भ्राजभृष्णुरिंद्रो मरु
द्भिरस्थात्प्रातर्यावभिरस्थात् दशसनिरसि दशसनिं मा कुर्वा विदन्मा गमयोद्यन्भ्राजभृष्णुरिंद्रो मरु
रस्थात् दिवायावभिरस्थाच्छतसनिरसि शतसनिं मा कुर्वा विदन्मा गमयोद्यन्भ्राजभृष्णुरिंद्रो
मरुद्भिरस्थात् सायंयावभिरस्थात् सहस्रसनिरसि सहस्रसनिं मा कुर्वा विदन्मा गमय इति मंत्रेण ततो दधि लोति
न्वा प्राश्याचम्य नखलोमादि श्मश्रु छेदयित्वा स्नात्वा आचम्य प्रादेशमितेनौदुंबरकाष्ठेन दंतधावनं ओं अन्नाद्या
याव्यूहध्वं सोमो राजायमागमत् स मे मुखं प्रमार्क्ष्यते यशसा च भगेन च इति मंत्रेण ततो दंतकाष्ठपर न २

ॐ

रित्युज्य आचम्य सुगंधद्रव्येणोद्वर्त्तनानंतरं स्नात्वाऽहिराचम्य चंदनं कुंकुमादिना नासिकामुखोद्द्वालंभनं ओं
प्राणापानौ मे तर्पय ओं चक्षुर्मे तर्पय ओं श्रोत्रं मे तर्पय इति मंत्रेण ततो दक्षिणामुखः पाणिना वामजानु
कृतापसव्योऽदक्षिणाग्रकुशत्रयतिलजलान्यादाय आहूतकुशत्रयोपरि पितॄन् तर्पयेत् ओं पितरः
शुंधध्वमिति मंत्रेण तत आचम्यानुलिप्यजपेत् ओं सुचक्षा अहमक्षिभ्यां भूयासं सुवर्चा मुखेन सुश्रुत्कर्णाभ्यां
भूयासं इति ततोऽहतवस्त्रपरिधानं ओं परिधास्यै यशो धास्यै दीर्घायुत्वाय जरदष्टिरस्मि शतं च जीवामि शरदः
पुरूचि रायस्पोषमभिसंव्ययिष्ये इति मंत्रेण तत उत्तरीयं ततो यज्ञोपवीतपरिधानं ओं यज्ञोपवीतं परमं पवित्रं
प्रजापतेर्यत्सहजं पुरस्तात् आयुष्यमग्र्यं प्रतिमुंच शुभ्रं यज्ञोपवीतं बलमस्तु तेजः २ इति मंत्रेणाचमनं अथ योत्त
रीयं ओं यशसा मा द्यावापृथिवी यशसेन्द्रावृहस्पती यशो भगश्च मा विदद्यशो मा प्रतिपद्यतां इति मं
त्रेण पुष्पग्रहणं ओं या आहरज्जमदग्निः श्रद्धायै कामायैन्द्रियाय ता अहं प्रतिगृह्णामि यशसा च भगेन इति मं ११५
६४ त्रेण ततः पुष्पमालापरिधानं ओं यद्यशोऽप्सरसामिन्द्रश्चकार विपुलं पृथु तेन संग्रथिताः सुमनस आबध्नामि
यशो मयि इति मंत्रेण अथोष्णीषेण शिरोवेष्टनं ओं युवा सुवासाः परिवीत आगात् स उ श्रेयान् भवति जायमा
नः तं धीरासः कवय उन्नयंति स्वाध्यो मनसा देवयंतः इति मंत्रेण ततः कुंडले परिदधाति ओं अलंकरणम
सि भूयोऽलंकरणं भूयात् इति मंत्रेण ततोंजनं ओं वृत्रस्यासि कनीनकश्चक्षुर्दा असि चक्षुर्मे देहि तत
आदर्शे आत्मदर्शनं ओं रोचिष्णुरसि मंत्रेण ततश्छत्रग्रहणं ओं बृहस्पतेश्छदिरसि पाप्मनो मामंतर्धेहि

ॐ

२२ तेजसो यशसो मा मंत्रं इन्द्रिहि इति मंत्रेण ततः पादयोरुपानहौ इति शुक्लानि ॐ प्रतिष्ठे स्थो विश्वतो मा पातं इति मंत्रेण ततो
वैणवदंडधारणं ॐ विश्वाभ्यो मा नाष्ट्राभ्यः परिपाहि सर्वतः इति मंत्रेण ततः आचार्याय वरं दक्षिणां दद्यात्
तत उत्थाय ॐ मूर्द्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आजातमग्निं कविं सम्राजमतिथिं जनानामासन्ना
पात्रं जनयंति देवाः स्वाहा इति मंत्रेण फलपुष्पसमन्वितं घृतपूर्णं स्रुवेण माणवकः करस्थेन उत्थाय पूर्णा दक्षिणा ५
हुतिमाचार्यः कुर्यादिति तत उपविश्य स्रुवेण भस्मानीय दक्षिणानामिकाग्रगृहीतभस्मना ॐ त्र्या
युषं जमदग्नेः इति ललाटे ॐ कश्यपस्य त्र्यायुषं इति ग्रीवायां ॐ यद्देवेषु त्र्यायुषं इति दक्षिणबाहुमू
ले ॐ तन्नो अस्तु त्र्यायुषमिति हृदि इति त्र्यायुषं कुर्यात् अनेनैव क्रमेण कुमारललाटादावपि
तत्तन्नो अस्तु त्र्यायुषं इत्यस्य स्थाने तत्ते इति विशेषः ततो ब्राह्मणादिग्रहणं इत्युपनयनविधिः सं
र्णः अथोपनयनसामग्रीभाण्डं लिख्यते॥ आपः तंडुलानि। रोली। गुड। मोलि। केसर। पतासे।
पुष्पमाला। धूप। दीप। बीडे २ दुने १ यज्ञोपवीत ९ प्रणीतापात्र २ प्रोक्षणीपात्र २ आज्यस्थाली २
कांस्यपात्रं अग्निस्थापने छायापात्रं मलसरी २ कुशाः स्रुवा पलाशसमिधा परतोगोह पूर्णपात्र २
कुपीनवस्त्र ५ उपरणे ५ धोति २ मृगचर्म २ पलाशदंड गुल्लरकी दातन मेखला मुंज दा मुहाडे
कुशो २६ नलेर २ पादुके २ पट्टि २ छत्रि २ वेणुदंड २ गुथली २ घृत तिल सुपारी दधि अक्षत देवजंक अंजन
दर्पण मोजा वस्त्र मोति २ उपानह उद्वर्तन रंग दूर्वा चंदोआ कसार सुगंध कस्तूरी शुभं भूयात्।

२२